॥ श्रीहरिः ॥ 1705

श्रीरामसहस्रनामस्तोत्रम्

(नामावलिसहितम्)

(संक्षिप्त प्रयोग-विधिसहित)

॥ श्रीहरिः॥

संक्षिप्त प्रयोग-विधि

सर्वप्रथम स्नान आदिसे पवित्र हो जाय। जब श्रीरामसहस्रनामस्तोत्रका पाठ करना हो अथवा सहस्रार्चन करना हो, श्रीरामजीकी प्रतिमाको अपने सम्मुख किसी काष्ठपीठ आदिपर यथाविधि स्थापित कर ले, अपने बैठनेका आसन भी लगा ले। पूजन आदिकी सभी सामग्रियोंको यथास्थान रखकर अपने आसनपर पूर्वाभिमुख या उत्तराभिमुख बैठ जाय। दीपक जलाकर पूर्वाभिमुख रख दे और हाथ धो ले। '**दीपज्योतिर्नमोऽस्तु ते**' कहकर पुष्प अर्पितकर कर्मसाक्षी दीपकका पूजन कर ले। तिलक लगा ले तथा निम्न मन्त्रोंसे आचमन करे—

'ॐ केशवाय नमः। ॐ नारायणाय नमः। ॐ माधवाय नमः।' तथा **'ॐ हृषीकेशाय नमः'** कहकर हाथ धो ले।

निम्न मन्त्रसे अपने ऊपर जल छिड़ककर मार्जन कर ले—

ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा।
यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः॥
ॐ पुण्डरीकाक्षः पुनातु, ॐ पुण्डरीकाक्षः पुनातु, ॐ पुण्डरीकाक्षः पुनातु।

तदनन्तर दाहिने हाथमें जल, पुष्प तथा अक्षत लेकर निम्न संकल्प करे—

ॐ विष्णुर्विष्णुर्विष्णुः श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य ब्रह्मणो द्वितीयपरार्धे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे

कलिप्रथमचरणे जम्बूद्वीपे भारतवर्षे आर्यावर्तैकदेशे ....नगरे/ग्रामे ....वैक्रमाब्दे ....संवत्सरे ....मासे ....पक्षे ....तिथौ ....वासरे ....गोत्रः शर्मा/वर्मा/गुप्तोऽहं श्रीरामप्रीत्यर्थं* सहस्त्रनामस्तोत्रपाठं करिष्ये। (यदि सहस्त्रार्चन करना हो तो **'सहस्त्रनामार्चनं करिष्ये'**—ऐसा बोलना चाहिये।)

हाथका जलाक्षत छोड़ दे। कार्यकी निर्विघ्न सिद्धिके लिये श्रीगणेशजीका स्मरण कर ले।

---

* अगर किसी कामनाकी सिद्धिके लिये सहस्त्रार्चन करना हो तो संकल्पमें **'यथेप्सितकार्यसिद्धिद्वारा श्रीरामप्रीत्यर्थं यथालब्धोपचारैः पूजनपूर्वकं ....द्रव्यैः सहस्त्रार्चनं करिष्ये'**—ऐसी योजना कर ले।

इसके बाद नीचे लिखे मन्त्रोंसे पंचोपचार या मानस-पूजन करके स्तोत्रका पाठ करना चाहिये—

मानस-पूजन—

१-ॐ लं पृथिव्यात्मकं गन्धं परिकल्पयामि।

(प्रभो! मैं पृथिवीरूप गन्ध (चन्दन) आपको अर्पित करता हूँ।)

२-ॐ हं आकाशात्मकं पुष्पं परिकल्पयामि।

(प्रभो! मैं आकाशरूप पुष्प आपको अर्पित करता हूँ।)

३-ॐ यं वाय्वात्मकं धूपं परिकल्पयामि।

(प्रभो! मैं वायुदेवके रूपमें धूप आपको प्रदान करता हूँ।)

४-ॐ रं वह्न्यात्मकं दीपं दर्शयामि।

(प्रभो! मैं अग्निदेवके रूपमें दीपक आपको प्रदान करता हूँ।)

५-ॐ वं अमृतात्मकं नैवेद्यं निवेदयामि।

(प्रभो! मैं अमृतके समान नैवेद्य आपको निवेदन करता हूँ।)

६-ॐ सौं सर्वात्मकं सर्वोपचारं समर्पयामि।

(प्रभो! मैं सर्वात्माके रूपमें संसारके सभी उपचारोंको आपके चरणोंमें समर्पित करता हूँ।)

सहस्रार्चन करते समय उपलब्ध सामग्रियोंसे षोडशोपचार या पंचोपचार-पूजन करना चाहिये, तदनन्तर सहस्रनामावलीके प्रत्येक नाममन्त्रसे सामग्री

रामजीपर चढ़ाये। स्त्रियों तथा जिनका यज्ञोपवीत नहीं हुआ है, उन्हें प्रत्येक नामके पहले '**ॐ**' के स्थानपर '**श्री**' शब्दका प्रयोग करना चाहिये, जैसे— '**श्रीरामाय नमः।**' अन्तमें आरती, पुष्पांजलि तथा क्षमा-प्रार्थना करके अर्चनको पूर्ण करे।

~~○~~

ॐ

श्रीपरमात्मने नमः

श्रीरामसहस्त्रनामस्तोत्रम्

राजीवलोचनः श्रीमान् श्रीरामो रघुपुङ्गवः।
रामभद्रः सदाचारो राजेन्द्रो जानकीपतिः॥ १॥

अग्रगण्यो वरेण्यश्च वरदः परमेश्वरः।
जनार्दनो जितामित्रः परार्थैकप्रयोजनः॥ २॥

विश्वामित्रप्रियो दान्तश्शत्रुजिच्छत्रुतापनः ।
सर्वज्ञः सर्वदेवादिः शरण्यो वालिमर्दनः ॥ ३ ॥

ज्ञानभाव्योऽपरिच्छेद्यो वाग्मी सत्यव्रतः शुचिः ।
ज्ञानगम्यो दृढप्रज्ञः खरध्वंसी प्रतापवान् ॥ ४ ॥

द्युतिमानात्मवान् वीरो जितक्रोधोऽरिमर्दनः ।
विश्वरूपो विशालाक्षः प्रभुः परिवृढो दृढः ॥ ५ ॥

ईशः खड्गधरः श्रीमान् कौसलेयोऽनसूयकः।
विपुलांसो महोरस्कः परमेष्ठी परायणः॥ ६॥

सत्यव्रतः सत्यसन्धो गुरुः परमधार्मिकः।
लोकज्ञो लोकवन्द्यश्च लोकात्मा लोककृत्परः॥ ७॥

अनादिर्भगवान् सेव्यो जितमायो रघूद्वहः।
रामो दयाकरो दक्षः सर्वज्ञः सर्वपावनः॥ ८॥

ब्रह्मण्यो नीतिमान् गोप्ता सर्वदेवमयो हरिः।
सुन्दरः पीतवासाश्च सूत्रकारः पुरातनः॥ ९ ॥

सौम्यो महर्षिः कोदण्डी सर्वज्ञः सर्वकोविदः।
कविः सुग्रीववरदः सर्वपुण्याधिकप्रदः॥ १० ॥

भव्यो जितारिषड्वर्गो महोदरोऽघनाशनः।
सुकीर्तिरादिपुरुषः कान्तः पुण्यकृतागमः॥ ११ ॥

अकल्मषश्चतुर्बाहुः सर्वावासो दुरासदः ।
स्मितभाषी निवृत्तात्मा स्मृतिमान् वीर्यवान् प्रभुः ॥ १२ ॥

धीरो दान्तो घनश्यामः सर्वायुधविशारदः ।
अध्यात्मयोगनिलयः सुमना लक्ष्मणाग्रजः ॥ १३ ॥

सर्वतीर्थमयश्शूरः सर्वयज्ञफलप्रदः ।
यज्ञस्वरूपी यज्ञेशो जरामरणवर्जितः ॥ १४ ॥

वर्णाश्रमकरो वर्णी शत्रुजित् पुरुषोत्तमः।
विभीषणप्रतिष्ठाता परमात्मा परात्परः॥ १५॥

प्रमाणभूतो दुर्ज्ञेयः पूर्णः परपुरञ्जयः।
अनन्तदृष्टिरानन्दो धनुर्वेदो धनुर्धरः॥ १६॥

गुणाकरो गुणश्रेष्ठः सच्चिदानन्दविग्रहः।
अभिवन्द्यो महाकायो विश्वकर्मा विशारदः॥ १७॥

विनीतात्मा वीतरागस्तपस्वीशो जनेश्वरः।
कल्याणप्रकृतिः कल्पः सर्वेशः सर्वकामदः॥ १८॥

अक्षयः पुरुषः साक्षी केशवः पुरुषोत्तमः।
लोकाध्यक्षो महामायो विभीषणवरप्रदः॥ १९॥

आनन्दविग्रहो ज्योतिर्हनुमत्प्रभुरव्ययः।
भ्राजिष्णुः सहनो भोक्ता सत्यवादी बहुश्रुतः॥ २०॥

सुखदः कारणं कर्ता भवबन्धविमोचनः।
देवचूडामणिर्नेता ब्रह्मण्यो ब्रह्मवर्धनः॥ २१॥

संसारोत्तारको रामः सर्वदुःखविमोक्षकृत्।
विद्वत्तमो विश्वकर्ता विश्वहर्ता च विश्वकृत्॥ २२॥

नित्यो नियतकल्याणः सीताशोकविनाशकृत्।
काकुत्स्थः पुण्डरीकाक्षो विश्वामित्रभयापहः॥ २३॥

मारीचमथनो रामो विराधवधपण्डितः।
दुस्स्वप्ननाशनो रम्यः किरीटी त्रिदशाधिपः॥ २४॥

महाधनुर्महाकायो भीमो भीमपराक्रमः।
तत्त्वस्वरूपी तत्त्वज्ञस्तत्त्ववादी सुविक्रमः॥ २५॥

भूतात्मा भूतकृत्स्वामी कालज्ञानी महापटुः।
अनिर्विण्णो गुणग्राही निष्कलङ्कः कलङ्कहा॥ २६॥

स्वभावभद्रश्शत्रुघ्नः केशवः स्थाणुरीश्वरः ।
भूतादिः शम्भुरादित्यः स्थविष्ठश्शाश्वतो ध्रुवः ॥ २७ ॥

कवची कुण्डली चक्री खड्गी भक्तजनप्रियः ।
अमृत्युर्जन्मरहितः सर्वजित्सर्वगोचरः ॥ २८ ॥

अनुत्तमोऽप्रमेयात्मा सर्वादिर्गुणसागरः ।
समः समात्मा समगो जटामुकुटमण्डितः ॥ २९ ॥

अजेयः सर्वभूतात्मा विष्वक्सेनो महातपाः ।
लोकाध्यक्षो महाबाहुरमृतो वेदवित्तमः ॥ ३० ॥

सहिष्णुः सद्गतिः शास्ता विश्वयोनिर्महाद्युतिः ।
अतीन्द्र ऊर्जितः प्रांशुरुपेन्द्रो वामनो बली ॥ ३१ ॥

धनुर्वेदो विधाता च ब्रह्मा विष्णुश्च शङ्करः ।
हंसो मरीचिर्गोविन्दो रत्नगर्भो महामतिः ॥ ३२ ॥

व्यासो वाचस्पतिः सर्वदर्पितासुरमर्दनः ।
जानकीवल्लभः पूज्यः प्रकटः प्रीतिवर्धनः ॥ ३३ ॥

सम्भवोऽतीन्द्रियो वेद्योऽनिर्देशो जाम्बवत्प्रभुः ।
मदनो मथनो व्यापी विश्वरूपो निरञ्जनः ॥ ३४ ॥

नारायणोऽग्रणीः साधुर्जटायुप्रीतिवर्धनः ।
नैकरूपो जगन्नाथः सुरकार्यहितः स्वभूः ॥ ३५ ॥

जितक्रोधो जितारातिः प्लवगाधिपराज्यदः ।
वसुदः सुभुजो नैकमायो भव्यप्रमोदनः ॥ ३६ ॥

चण्डांशुः सिद्धिदः कल्पः शरणागतवत्सलः ।
अगदो रोगहर्ता च मन्त्रज्ञो मन्त्रभावनः ॥ ३७ ॥

सौमित्रिवत्सलो धुर्यो व्यक्ताव्यक्तस्वरूपधृक् ।
वसिष्ठो ग्रामणीः श्रीमाननुकूलः प्रियंवदः ॥ ३८ ॥

अतुलः सात्त्विको धीरः शरासनविशारदः ।
ज्येष्ठः सर्वगुणोपेतः शक्तिमांस्ताटकान्तकः ॥ ३९ ॥

वैकुण्ठः प्राणिनां प्राणः कमठः कमलापतिः ।
गोवर्धनधरो मत्स्यरूपः कारुण्यसागरः ॥ ४० ॥

कुम्भकर्णप्रभेत्ता च गोपिगोपालसंवृतः ।
मायावी व्यापको व्यापी रैणुकेयबलापहः ॥ ४१ ॥

पिनाकमथनो वन्द्यः समर्थो गरुडध्वजः।
लोकत्रयाश्रयो लोकचरितो भरताग्रजः॥ ४२॥

श्रीधरः सद्गतिर्लोकसाक्षी नारायणो बुधः।
मनोवेगी मनोरूपी पूर्णः पुरुषपुङ्गवः॥ ४३॥

यदुश्रेष्ठो यदुपतिर्भूतावासः सुविक्रमः।
तेजोधरो धराधारश्चतुर्मूर्तिर्महानिधिः॥ ४४॥

चाणूरमर्दनो दिव्यश्शान्तो भरतवन्दितः ।
शब्दातिगो गभीरात्मा कोमलाङ्गः प्रजागरः ॥ ४५ ॥

लोकगर्भश्शेषशायी क्षीराब्धिनिलयोऽमलः ।
आत्मयोनिरदीनात्मा सहस्त्राक्षः सहस्त्रपात् ॥ ४६ ॥

अमृतांशुर्महागर्भो निवृत्तविषयस्पृहः ।
त्रिकालज्ञो मुनिस्साक्षी विहायसगतिः कृती ॥ ४७ ॥

पर्जन्यः कुमुदो भूतावासः कमललोचनः।
श्रीवत्सवक्षाः श्रीवासो वीरहा लक्ष्मणाग्रजः ॥ ४८ ॥

लोकाभिरामो लोकारिमर्दनः सेवकप्रियः।
सनातनतमो मेघश्यामलो राक्षसान्तकृत् ॥ ४९ ॥

दिव्यायुधधरश्श्रीमानप्रमेयो जितेन्द्रियः।
भूदेववन्द्यो जनकप्रियकृत्प्रपितामहः ॥ ५० ॥

उत्तमः सात्त्विकः सत्यः सत्यसन्धस्त्रिविक्रमः ।
सुव्रतः सुलभः सूक्ष्मः सुघोषः सुखदः सुधीः ॥ ५१ ॥
दामोदरोऽच्युतश्शार्ङ्गी वामनो मधुराधिपः ।
देवकीनन्दनः शौरिः शूरः कैटभमर्दनः ॥ ५२ ॥
सप्ततालप्रभेत्ता च मित्रवंशप्रवर्धनः ।
कालस्वरूपी कालात्मा कालः कल्याणदः कविः ॥ ५३ ॥

संवत्सर ॠतुः पक्षो ह्ययनं दिवसो युगः।
स्तव्यो विविक्तो निर्लेपः सर्वव्यापी निराकुलः।
अनादिनिधनः सर्वलोकपूज्यो निरामयः॥ ५४॥

रसो रसज्ञः सारज्ञो लोकसारो रसात्मकः।
सर्वदुःखातिगो विद्याराशिः परमगोचरः॥ ५५॥

शेषो विशेषो विगतकल्मषो रघुनायकः।
वर्णश्रेष्ठो वर्णवाह्यो वर्ण्यो वर्ण्यगुणोज्ज्वलः ॥ ५६ ॥

कर्मसाक्ष्यमरश्रेष्ठो देवदेवः सुखप्रदः।
देवाधिदेवो देवर्षिर्देवासुरनमस्कृतः ॥ ५७ ॥

सर्वदेवमयश्चक्री शार्ङ्गपाणी रघूत्तमः।
मनो बुद्धिरहंकारः प्रकृतिः पुरुषोऽव्ययः ॥ ५८ ॥

अहल्यापावनः स्वामी पितृभक्तो वरप्रदः।
न्यायो न्यायी नयी श्रीमान्नयो नगधरो ध्रुवः ॥ ५९ ॥

लक्ष्मीविश्वम्भराभर्ता देवेन्द्रो बलिमर्दनः।
वाणारिमर्दनो यज्वानुत्तमो मुनिसेवितः ॥ ६० ॥

देवाग्रणीः शिवध्यानतत्परः परमः परः।
सामगेयः प्रियोऽक्रूरः पुण्यकीर्तिस्सुलोचनः ॥ ६१ ॥

पुण्यः पुण्याधिकः पूर्वः पूर्णः पूरयिता रविः ।
जटिलः कल्मषध्वान्तप्रभञ्जनविभावसुः ॥ ६२ ॥

अव्यक्तलक्षणोऽव्यक्तो दशास्यद्विपकेसरी ।
कलानिधिः कलानाथो कमलानन्दवर्धनः ॥ ६३ ॥

जयी जितारिः सर्वादिः शमनो भवभञ्जनः ।
अलङ्करिष्णुरचलो रोचिष्णुर्विक्रमोत्तमः ॥ ६४ ॥

आशुः शब्दपतिः शब्दागोचरो रञ्जनो रघुः।
निश्शब्दः प्रणवो माली स्थूलः सूक्ष्मो विलक्षणः ॥ ६५ ॥

आत्मयोनिरयोनिश्च सप्तजिह्वः सहस्त्रपात्।
सनातनतमस्स्त्रग्वी पेशलो जविनां वरः ॥ ६६ ॥

शक्तिमाञ्शङ्खभृन्नाथः गदापद्मरथाङ्गभृत्।
निरोहो निर्विकल्पश्च चिद्रूपो वीतसाध्वसः ॥ ६७ ॥

शतानन: सहस्त्राक्ष: शतमूर्तिर्घनप्रभ:।
हृत्पुण्डरीकशयन: कठिनो द्रव एव च॥ ६८॥

उग्रो ग्रहपति: श्रीमान् समर्थोऽनर्थनाशन:।
अधर्मशत्रू रक्षोघ्न: पुरुहूत: पुरुष्टुत:॥ ६९॥

ब्रह्मगर्भो बृहद्गर्भो धर्मधेनुर्धनागम:।
हिरण्यगर्भो ज्योतिष्मान् सुललाट: सुविक्रम:॥ ७०॥

शिवपूजारतः श्रीमान् भवानीप्रियकृद्वशी।
नरो नारायणः श्यामः कपर्दीनीललोहितः ॥ ७१ ॥

रुद्रः पशुपतिः स्थाणुर्विश्वामित्रो द्विजेश्वरः।
मातामहो मातरिश्वा विरिञ्चो विष्टरश्रवाः ॥ ७२ ॥

अक्षोभ्यः सर्वभूतानां चण्डः सत्यपराक्रमः।
वालखिल्यो महाकल्पः कल्पवृक्षः कलाधरः ॥ ७३ ॥

निदाघस्तपनोऽमोघः श्लक्ष्णः परबलापहृत् ।
कबन्धमथनो दिव्यः कम्बुग्रीवशिवप्रियः ॥ ७४ ॥

शङ्खोऽनिलः सुनिष्पन्नः सुलभः शिशिरात्मकः ।
असंसृष्टोऽतिथिः शूरः प्रमाथी पापनाशकृत् ॥ ७५ ॥

वसुश्रवाः कव्यवाहः प्रतप्तो विश्वभोजनः ।
रामो नीलोत्पलश्यामो ज्ञानस्कन्धो महाद्युतिः ॥ ७६ ॥

पवित्रपादः पापारिर्मणिपूरो नभोगतिः ।
उत्तारणो दुष्कृतिहा दुर्धर्षो दुस्सहोऽभयः ॥ ७७ ॥

अमृतेशोऽमृतवपुर्धर्मी धर्मः कृपाकरः ।
भर्गो विवस्वानादित्यो योगाचार्यो दिवस्पतिः ॥ ७८ ॥

उदारकीर्तिरुद्योगी वाङ्मयः सदसन्मयः ।
नक्षत्रमाली नाकेशः स्वाधिष्ठानः षडाश्रयः ॥ ७९ ॥

चतुर्वर्गफलो वर्णी शक्तित्रयफलं निधिः ।
निधानगर्भो निर्व्याजो गिरीशो व्यालमर्दनः ॥ ८० ॥

श्रीवल्लभः शिवारम्भः शान्तिर्भद्रः समञ्जसः ।
भूशयो भूतिकृद्भूतिर्भूषणो भूतवाहनः ॥ ८१ ॥

अकायो भक्तकायस्थः कालज्ञानी महावटुः ।
परार्थवृत्तिरचलो विविक्तः श्रुतिसागरः ॥ ८२ ॥

स्वभावभद्रो मध्यस्थः संसारभयनाशनः।
वेद्यो वैद्यो वियद्गोप्ता सर्वामरमुनीश्वरः॥ ८३॥

सुरेन्द्रः करणं कर्म कर्मकृत्कर्म्यधोक्षजः।
ध्येयो धुर्यो धराधीशः संकल्पः शर्वरीपतिः॥ ८४॥

परमार्थगुरुर्वृद्धः शुचिराश्रितवत्सलः।
विष्णुर्जिष्णुर्विभुर्वन्द्यो यज्ञेशो यज्ञपालकः॥ ८५॥

प्रभविष्णुर्ग्रसिष्णुश्च लोकात्मा लोकभावनः।
केशवः केशिहा काव्यः कविः कारणकारणम्॥ ८६॥

कालकर्ता कालशेषो वासुदेवः पुरुष्टुतः।
आदिकर्ता वराहश्च माधवो मधुसूदनः॥ ८७॥

नारायणो नरो हंसो विष्वक्सेनो जनार्दनः।
विश्वकर्ता महायज्ञो ज्योतिष्मान् पुरुषोत्तमः॥ ८८॥

वैकुण्ठः पुण्डरीकाक्षः कृष्णः सूर्यः सुरार्चितः ।
नारसिंहो महाभीमो वक्रदंष्ट्रो नखायुधः ॥ ८९ ॥

आदिदेवो जगत्कर्ता योगीशो गरुडध्वजः ।
गोविन्दो गोपतिर्गोप्ता भूपतिर्भुवनेश्वरः ॥ ९० ॥

पद्मनाभो हृषीकेशो धाता दामोदरः प्रभुः ।
त्रिविक्रमस्त्रिलोकेशो ब्रह्मेशः प्रीतिवर्धनः ॥ ९१ ॥

वामनो दुष्टदमनो गोविन्दो गोपवल्लभः।
भक्तप्रियोऽच्युतः सत्यः सत्यकीर्तिर्धृतिः स्मृतिः ॥ १२ ॥

कारुण्यं करुणो व्यासः पापहा शान्तिवर्धनः।
संन्यासी शास्त्रतत्त्वज्ञो मन्दराद्रिनिकेतनः ॥ १३ ॥

बदरीनिलयः शान्तस्तपस्वी वैद्युतप्रभः।
भूतावासो गुहावासः श्रीनिवासः श्रियःपतिः ॥ १४ ॥

तपोवासो मुदावासः सत्यवासः सनातनः ।
पुरुषः पुष्करः पुण्यः पुष्कराक्षो महेश्वरः ॥ ९५ ॥

पूर्णमूर्तिः पुराणज्ञः पुण्यदः प्रीतिवर्धनः ।
शङ्खी चक्री गदी शार्ङ्गी लाङ्गली मुसली हली ॥ ९६ ॥

किरीटी कुण्डली हारी मेखली कवची ध्वजी ।
योद्धा जेता महावीर्यः शत्रुजिच्छत्रुतापनः ॥ ९७ ॥

शास्ता शास्त्रकरः शास्त्रं शङ्करः शङ्करस्तुतः ।
सारथिः सात्त्विकः स्वामी सामवेदप्रियः समः ॥ ९८ ॥

पवनः संहतः शक्तिः सम्पूर्णाङ्गः समृद्धिमान् ।
स्वर्गदः कामदः श्रीदः कीर्तिदोऽकीर्तिनाशनः ॥ ९९ ॥

मोक्षदः पुण्डरीकाक्षः क्षीराब्धिकृतकेतनः ।
सर्वात्मा सर्वलोकेशः प्रेरकः पापनाशनः ॥ १०० ॥

सर्वव्यापी जगन्नाथः सर्वलोकमहेश्वरः।
सर्गस्थित्यन्तकृद्देवः सर्वलोकसुखावहः॥ १०१॥

अक्षय्यः शाश्वतोऽनन्तः क्षयवृद्धिविवर्जितः।
निर्लेपो निर्गुणः सूक्ष्मो निर्विकारो निरञ्जनः॥ १०२॥

सर्वोपाधिविनिर्मुक्तः सत्तामात्रव्यवस्थितः।
अधिकारी विभुर्नित्यः परमात्मा सनातनः॥ १०३॥

अचलो निर्मलो व्यापी नित्यतृप्तो निराश्रयः ।
श्यामो युवा लोहिताक्षो दीप्तास्यो मितभाषणः ॥ १०४ ॥

आजानुबाहुः सुमुखः सिंहस्कन्धो महाभुजः ।
सत्यवान् गुणसम्पन्नः स्वयंतेजाः सुदीप्तिमान् ॥ १०५ ॥

कालात्मा भगवान् कालः कालचक्रप्रवर्तकः ।
नारायणः परंज्योतिः परमात्मा सनातनः ॥ १०६ ॥

विश्वसृड्विश्वगोप्ता च विश्वभोक्ता च शाश्वतः।
विश्वेश्वरो विश्वमूर्तिर्विश्वात्मा विश्वभावनः॥ १०७॥

सर्वभूतसुहृच्छान्तः सर्वभूतानुकम्पनः।
सर्वेश्वरेश्वरः सर्वः श्रीमानाश्रितवत्सलः॥ १०८॥

सर्वगः सर्वभूतेशः सर्वभूताशयस्थितः।
अभ्यन्तरस्थस्तमसश्छेत्ता नारायणः परः॥ १०९॥

अनादिनिधनः स्त्रष्टा प्रजापतिपतिर्हरिः।
नरसिंहो हृषीकेशः सर्वात्मा सर्वदृग्वशी॥ ११०॥

जगतस्तस्थुषश्चैव प्रभुर्नेता सनातनः।
कर्ता धाता विधाता च सर्वेषां प्रभुरीश्वरः॥ १११॥

सहस्त्रमूर्तिर्विश्वात्मा विष्णुर्विश्वदृगव्ययः।
पुराणपुरुषः स्रष्टा सहस्त्राक्षः सहस्त्रपात्॥ ११२॥

तत्त्वं नारायणो विष्णुर्वासुदेवः सनातनः।
परमात्मा परं ब्रह्म सच्चिदानन्दविग्रहः॥ ११३॥

परं ज्योतिः परं धामः पराकाशः परात्परः।
अच्युतः पुरुषः कृष्णः शाश्वतः शिव ईश्वरः॥ ११४॥

नित्यः सर्वगतः स्थाणुरुग्रः साक्षी प्रजापतिः।
हिरण्यगर्भः सविता लोककृल्लोकभृद्विभुः॥ ११५॥

रामः श्रीमान् महाविष्णुर्जिष्णुर्देवहितावहः ।
तत्त्वात्मा तारकं ब्रह्म शाश्वतः सर्वसिद्धिदः ॥ ११६ ॥

अकारवाच्यो भगवान् श्रीर्भूलीलापतिः पुमान् ।
सर्वलोकेश्वरः श्रीमान् सर्वज्ञः सर्वतोमुखः ॥ ११७ ॥

स्वामी सुशीलः सुलभः सर्वज्ञः सर्वशक्तिमान् ।
नित्यः सम्पूर्णकामश्च नैसर्गिकसुहृत्सुखी ॥ ११८ ॥

कृपापीयूषजलधिश्शरण्यः सर्वदेहिनाम् ।
श्रीमान्नारायणः स्वामी जगतां पतिरीश्वरः ॥ ११९ ॥

श्रीशः शरण्यो भूतानां संश्रिताभीष्टदायकः ।
अनन्तः श्रीपती रामो गुणभृन्निर्गुणो महान् ॥ १२० ॥

श्रीरामसहस्त्रनामस्तोत्रं सम्पूर्णम् ॥

श्रीरामाष्टोत्तरशतनामस्तोत्रम्

श्रीराघवं दशरथात्मजमप्रमेयं
सीतापतिं रघुकुलान्वयरत्नदीपम्।
आजानुबाहुमरविन्ददलायताक्षं
रामं निशाचरविनाशकरं नमामि॥

वैदेहीसहितं सुरद्रुमतले हैमे महामण्डपे
मध्ये पुष्पकमासने मणिमये वीरासने सुस्थितम्।
अग्रे वाचयति प्रभञ्जनसुते तत्त्वं मुनिभ्यः परं
व्याख्यान्तं भरतादिभिः परिवृतं रामं भजे श्यामलम्॥

श्रीरामो रामभद्रश्च रामचन्द्रश्च शाश्वतः।
राजीवलोचनः श्रीमान् राजेन्द्रो रघुपुङ्गवः॥ १॥

जानकीवल्लभो जैत्रो जितामित्रो जनार्दनः ।
विश्वामित्रप्रियो दान्तः शत्रुजिच्छत्रुतापनः ॥ २ ॥

वालिप्रमथनो वाग्मी सत्यवाक् सत्यविक्रमः ।
सत्यव्रतो व्रतधरः सदा हनुमदाश्रितः ॥ ३ ॥

कौसलेयः खरध्वंसी विराधवधपण्डितः ।
विभीषणपरित्राता हरकोदण्डखण्डनः ॥ ४ ॥

सप्ततालप्रभेत्ता च दशग्रीवशिरोहरः।
जामदग्न्यमहादर्पदलनस्ताटकान्तकः ॥ ५ ॥

वेदान्तसारो वेदात्मा भवरोगस्य भेषजम्।
दूषणत्रिशिरोहन्ता त्रिमूर्तिस्त्रिगुणात्मकः ॥ ६ ॥

त्रिविक्रमस्त्रिलोकात्मा पुण्यचारित्रकीर्तनः।
त्रिलोकरक्षको धन्वी दण्डकारण्यपावनः ॥ ७ ॥

अहल्याशापशमनः पितृभक्तो वरप्रदः ।
जितेन्द्रियो जितक्रोधो जितामित्रो जगद्गुरुः ॥ ८ ॥

ऋक्षवानरसंघाती चित्रकूटसमाश्रयः ।
जयन्तत्राणवरदः सुमित्रापुत्रसेवितः ॥ ९ ॥

सर्वदेवादिदेवश्च मृतवानरजीवनः ।
मायामारीचहन्ता च महादेवो महाभुजः ॥ १० ॥

सर्वदेवस्तुतः सौम्यो ब्रह्मण्यो मुनिसंस्तुतः।
महायोगी महोदारः सुग्रीवेप्सितराज्यदः॥ ११॥

सर्वपुण्याधिकफलः स्मृतसर्वाघनाशनः।
आदिदेवो महादेवो महापूरुष एव च॥ १२॥

पुण्योदयो दयासारः पुराणपुरुषोत्तमः।
स्मितवक्त्रो मिताभाषी पूर्वभाषी च राघवः॥ १३॥

अनन्तगुणगम्भीरो धीरोदात्तगुणोत्तमः ।
मायामानुषचारित्रो महादेवादिपूजितः ॥ १४ ॥

सेतुकृज्जितवारीशः सर्वतीर्थमयो हरिः ।
स्यामाङ्गः सुन्दरः शूरः पीतवासा धनुर्धरः ॥ १५ ॥

सर्वयज्ञाधिपो यज्वा जरामरणवर्जितः ।
शिवलिङ्गप्रतिष्ठाता सर्वावगुणवर्जितः ॥ १६ ॥

परमात्मा परं ब्रह्म सच्चिदानन्दविग्रहः।
परं ज्योतिः परं धाम पराकाशः परात्परः॥ १७॥
परेशः पारगः पारः सर्वदेवात्मकः परः॥

इति श्रीरामाष्टोत्तरशतनामस्तोत्रं सम्पूर्णम्।

~~○~~

श्रीमहादेवकृतरामस्तुतिः

श्रीमहादेव उवाच

नमोऽस्तु रामाय सशक्तिकाय
नीलोत्पलश्यामलकोमलाय ।
किरीटहाराङ्गदभूषणाय
सिंहासनस्थाय महाप्रभाय ॥ १ ॥

त्वमादिमध्यान्तविहीन एकः
सृजस्यवस्यत्सि च लोकजातम् ।
स्वमायया तेन न लिप्यसे त्वं
यत्स्वे सुखेऽजस्त्ररतोऽनवद्यः ॥ २ ॥

लीलां विधत्से गुणसंवृतस्त्वं
प्रसन्नभक्तानुविधानहेतोः ।

नानाऽवतारैः सुरमानुषाद्यैः
प्रतीयसे ज्ञानिभिरेव नित्यम् ॥ ३ ॥

स्वांशेन लोकं सकलं विधाय तं
बिभर्षि च त्वं तदधः फणीश्वरः ।
उपर्यधो भान्वनिलोडुपौषधी-
प्रकर्षरूपोऽवसि नैकधा जगत् ॥ ४ ॥

त्वमिह देहभृतां शिखिरूपः
पचसि भक्तमशेषमजस्रम्।
पवनपञ्चकरूपसहायो
जगदखण्डमनेन बिभर्षि॥ ५ ॥

चन्द्रसूर्यशिखिमध्यगतं यत्
तज ईश चिदशेषतनूनाम्।

प्राभवत्तनुभृतामिह धैर्यं
शौर्यमायुरखिलं तव सत्त्वम् ॥ ६ ॥

त्वं विरिञ्चिशिवविष्णुविभेदात्
कालकर्मशशिसूर्यविभागात् ।
वादिनां पृथगिवेश विभासि
ब्रह्म निश्चितमनन्यदिहैकम् ॥ ७ ॥

मत्स्यादिरूपेण यथा त्वमेकः
श्रुतौ पुराणेषु च लोकसिद्धः।
तथैव सर्वं सदसद्विभाग-
स्त्वमेव नान्यद्भवतो विभाति॥८॥

मद्यत्समुत्पन्नमनन्तसृष्टा-
वुत्पत्स्यते यच्च भवच्च यच्च।

न दृश्यते स्थावरजङ्गमादौ
त्वया विनाऽतः परतः परस्त्वम् ॥ ९ ॥

तत्त्वं न जानन्ति परात्मनस्ते
जनाः समस्तास्तव माययातः।
त्वद्भक्तसेवामलमानसानां
विभाति तत्त्वं परमेकमैशम् ॥ १० ॥

ब्रह्मादयस्ते न विदुः स्वरूपं
चिदात्मतत्त्वं बहिरर्थभावाः।
ततो बुधस्त्वामिदमेव रूपं
भक्त्या भजन्मुक्तिमुपैत्यदुःखः ॥ ११ ॥

अहं भवन्नामगुणैः कृतार्थो
वसामि काश्यामनिशं भवान्या।

मुमूर्षमाणस्य विमुक्तयेऽहं
दिशामि मन्त्र तव राम नाम ॥ १२ ॥
इमं स्तवं नित्यमनन्यभक्त्या
श्रृण्वन्ति गायन्ति लिखन्ति ये वै।
ते सर्वसौख्यं परमं च लब्ध्वा
भवत्पदं यान्तु भवत्प्रसादात् ॥ १३ ॥

इति श्रीमहादेवकृतरामस्तोत्रं सम्पूर्णम् ॥

~~○~~

श्रीरामाष्टकम्

कृतार्तदेववन्दनं दिनेशवंशनन्दनम्।
सुशोभिभालचन्दनं नमामि राममीश्वरम्॥ १॥

मुनीन्द्रयज्ञकारकं शिलाविपत्तिहारकम्।
महाधनुर्विदारकं नमामि राममीश्वरम्॥ २॥

स्वतातवाक्यकारिणं तपोवने विहारिणम्।
करेषु चापधारिणं नमामि राममीश्वरम्॥ ३॥

कुरङ्गमुक्तसायकं जटायुमोक्षदायकम्।
प्रविद्धकीशनायकं नमामि राममीश्वरम्॥ ४॥

प्लवङ्गसङ्गसम्मतिं निबद्धनिम्नगापतिम्।
दशास्यवंशसङ्क्षतिं नमामि राममीश्वरम्॥ ५॥

विदीनदेवहर्षणं कपीप्सितार्थवर्षणम्।
स्वबन्धुशोककर्षणं नमामि राममीश्वरम्॥ ६॥

गतारिराज्यरक्षणं प्रजाजनार्तिभक्षणम्।
कृतास्तमोहलक्षणं नमामि राममीश्वरम्॥ ७॥

हृताखिलाचलाभरं स्वधामनीतनागरम्।
जगत्तमोदिवाकरं नमामि राममीश्वरम्॥ ८॥

इदं समाहितात्मना नरो रघूत्तमाष्टकम्।
पठन्निरन्तरं भयं भवोद्भवं न विन्दते॥ ९॥

इति श्रीपरमहंसस्वामिब्रह्मानन्दविरचितं श्रीरामाष्टकं सम्पूर्णम्॥

~~~○~~~
~~~

॥ श्रीरामाय नमः॥

श्रीरामसहस्त्रनामावलिः

१ ॐ राजीवलोचनाय नमः।

२ ॐ श्रीमते नमः।

३ ॐ श्रीरामाय नमः।

४ ॐ रघुपुङ्गवाय नमः।

५ ॐ रामभद्राय नमः।

६ ॐ सदाचाराय नमः।

७ ॐ राजेन्द्राय नमः।

८ ॐ जानकीपतये नमः।

९ ॐ अग्रगण्याय नमः।

१० ॐ वरेण्याय नमः।

११ ॐ वरदाय नमः।

१२ ॐ परमेश्वराय नमः।

१३ ॐ जनार्दनाय नमः।
१४ ॐ जितामित्राय नमः।
१५ ॐ परार्थैकप्रयोजनाय नमः।
१६ ॐ विश्वामित्रप्रियाय नमः।
१७ ॐ दान्ताय नमः।
१८ ॐ शत्रुजिते नमः।
१९ ॐ शत्रुतापनाय नमः।
२० ॐ सर्वज्ञाय नमः।
२१ ॐ सर्वदेवादये नमः।
२२ ॐ शरण्याय नमः।
२३ ॐ वालिमर्दनाय नमः।
२४ ॐ ज्ञानभाव्याय नमः।
२५ ॐ अपरिच्छेद्याय नमः।
२६ ॐ वाग्मिने नमः।
२७ ॐ सत्यव्रताय नमः।
२८ ॐ शुचये नमः।
२९ ॐ ज्ञानगम्याय नमः।
३० ॐ दृढप्रज्ञाय नमः।

३१ ॐ खरध्वंसिने नमः।
३२ ॐ प्रतापवते नमः।
३३ ॐ द्युतिमते नमः।
३४ ॐ आत्मवते नमः।
३५ ॐ वीराय नमः।
३६ ॐ जितक्रोधाय नमः।
३७ ॐ अरिमर्दनाय नमः।
३८ ॐ विश्वरूपाय नमः।
३९ ॐ विशालाक्षाय नमः।
४० ॐ प्रभवे नमः।
४१ ॐ परिवृढाय नमः।
४२ ॐ दृढाय नमः।
४३ ॐ ईशाय नमः।
४४ ॐ खड्गधराय नमः।
४५ ॐ श्रीमते नमः।
४६ ॐ कौसलेयाय नमः।
४७ ॐ अनसूयकाय नमः।
४८ ॐ विपुलांसाय नमः।

४९ ॐ महोरस्काय नमः।
५० ॐ परमेष्ठिने नमः।
५१ ॐ परायणाय नमः।
५२ ॐ सत्यव्रताय नमः।
५३ ॐ सत्यसन्धाय नमः।
५४ ॐ गुरवे नमः।
५५ ॐ परमधार्मिकाय नमः।
५६ ॐ लोकज्ञाय नमः।
५७ ॐ लोकवन्द्याय नमः।
५८ ॐ लोकात्मने नमः।
५९ ॐ लोककृते नमः।
६० ॐ परस्मै नमः।
६१ ॐ अनादये नमः।
६२ ॐ भगवते नमः।
६३ ॐ सेव्याय नमः।
६४ ॐ जितमायाय नमः।
६५ ॐ रघूद्वहाय नमः।
६६ ॐ रामाय नमः।

६७ ॐ दयाकराय नमः।

६८ ॐ दक्षाय नमः।

६९ ॐ सर्वज्ञाय नमः।

७० ॐ सर्वपावनाय नमः।

७१ ॐ ब्रह्मण्याय नमः।

७२ ॐ नीतिमते नमः।

७३ ॐ गोप्त्रे नमः।

७४ ॐ सर्वदेवमयाय नमः।

७५ ॐ हरये नमः।

७६ ॐ सुन्दराय नमः।

७७ ॐ पीतवाससे नमः।

७८ ॐ सूत्रकाराय नमः।

७९ ॐ पुरातनाय नमः।

८० ॐ सौम्याय नमः।

८१ ॐ महर्षये नमः।

८२ ॐ कोदण्डिने नमः।

८३ ॐ सर्वज्ञाय नमः।

८४ ॐ सर्वकोविदाय नमः।

८५ ॐ कवये नमः।
८६ ॐ सुग्रीववरदाय नमः।
८७ ॐ सर्वपुण्याधिकप्रदाय नमः।
८८ ॐ भव्याय नमः।
८९ ॐ जितारिषड्वर्गाय नमः।
९० ॐ महोदराय नमः।
९१ ॐ अघनाशनाय नमः।
९२ ॐ सुकीर्तये नमः।
९३ ॐ आदिपुरुषाय नमः।
९४ ॐ कान्ताय नमः।
९५ ॐ पुण्यकृतागमाय नमः।
९६ ॐ अकल्मषाय नमः।
९७ ॐ चतुर्बाहवे नमः।
९८ ॐ सर्वावासाय नमः।
९९ ॐ दुरासदाय नमः।
१०० ॐ स्मितभाषिणे नमः।
१०१ ॐ निवृत्तात्मने नमः।
१०२ ॐ स्मृतिमते नमः।

१०३ ॐ वीर्यवते नमः।
१०४ ॐ प्रभवे नमः।
१०५ ॐ धीराय नमः।
१०६ ॐ दान्ताय नमः।
१०७ ॐ घनश्यामाय नमः।
१०८ ॐ सर्वायुधविशारदाय नमः।
१०९ ॐ अध्यात्मयोगनिलयाय नमः।
११० ॐ सुमनसे नमः।
१११ ॐ लक्ष्मणाग्रजाय नमः।
११२ ॐ सर्वतीर्थमयाय नमः।
११३ ॐ शूराय नमः।
११४ ॐ सर्वयज्ञफलप्रदाय नमः।
११५ ॐ यज्ञस्वरूपिणे नमः।
११६ ॐ यज्ञेशाय नमः।
११७ ॐ जरामरणवर्जिताय नमः।
११८ ॐ वर्णाश्रमकराय नमः।
११९ ॐ वर्णिने नमः।
१२० ॐ शत्रुजिते नमः।

१२१ ॐ पुरुषोत्तमाय नमः।
१२२ ॐ विभीषणप्रतिष्ठात्रे नमः।
१२३ ॐ परमात्मने नमः।
१२४ ॐ परात्परस्मै नमः।
१२५ ॐ प्रमाणभूताय नमः।
१२६ ॐ दुर्ज्ञेयाय नमः।
१२७ ॐ पूर्णाय नमः।
१२८ ॐ परपुरञ्जयाय नमः।
१२९ ॐ अनन्तदृष्टये नमः।
१३० ॐ आनन्दाय नमः।
१३१ ॐ धनुर्वेदाय नमः।
१३२ ॐ धनुर्धराय नमः।
१३३ ॐ गुणाकराय नमः।
१३४ ॐ गुणश्रेष्ठाय नमः।
१३५ ॐ सच्चिदानन्दविग्रहाय नमः।
१३६ ॐ अभिवन्द्याय नमः।
१३७ ॐ महाकायाय नमः।
१३८ ॐ विश्वकर्मणे नमः।

१३९ ॐ विशारदाय नमः।
१४० ॐ विनीतात्मने नमः।
१४१ ॐ वीतरागाय नमः।
१४२ ॐ तपस्वीशाय नमः।
१४३ ॐ जनेश्वराय नमः।
१४४ ॐ कल्याणप्रकृतये नमः।
१४५ ॐ कल्पाय नमः।
१४६ ॐ सर्वेशाय नमः।
१४७ ॐ सर्वकामदाय नमः।
१४८ ॐ अक्षयाय नमः।
१४९ ॐ पुरुषाय नमः।
१५० ॐ साक्षिणे नमः।
१५१ ॐ केशवाय नमः।
१५२ ॐ पुरुषोत्तमाय नमः।
१५३ ॐ लोकाध्यक्षाय नमः।
१५४ ॐ महामायाय नमः।
१५५ ॐ विभीषणवरप्रदाय नमः।
१५६ ॐ आनन्दविग्रहाय नमः।

१५७ ॐ ज्योतिषे नमः।
१५८ ॐ हनुमत्प्रभवे नमः।
१५९ ॐ अव्ययाय नमः।
१६० ॐ भ्राजिष्णवे नमः।
१६१ ॐ सहनाय नमः।
१६२ ॐ भोक्त्रे नमः।
१६३ ॐ सत्यवादिने नमः।
१६४ ॐ बहुश्रुताय नमः।
१६५ ॐ सुखदाय नमः।
१६६ ॐ कारणाय नमः।
१६७ ॐ कर्त्रे नमः।
१६८ ॐ भवबन्धविमोचनाय नमः।
१६९ ॐ देवचूडामणये नमः।
१७० ॐ नेत्रे नमः।
१७१ ॐ ब्रह्मण्याय नमः।
१७२ ॐ ब्रह्मवर्धनाय नमः।
१७३ ॐ संसारोत्तारकाय नमः।
१७४ ॐ रामाय नमः।

१७५ ॐ सर्वदुःखविमोक्षकृते नमः।
१७६ ॐ विद्वत्तमाय नमः।
१७७ ॐ विश्वकर्त्रे नमः।
१७८ ॐ विश्वहर्त्रे नमः।
१७९ ॐ विश्वकृते नमः।
१८० ॐ नित्याय नमः।
१८१ ॐ नियतकल्याणाय नमः।
१८२ ॐ सीताशोकविनाश-
कृते नमः।

१८३ ॐ काकुत्स्थाय नमः।
१८४ ॐ पुण्डरीकाक्षाय नमः।
१८५ ॐ विश्वामित्रभयापहाय नमः।
१८६ ॐ मारीचमथनाय नमः।
१८७ ॐ रामाय नमः।
१८८ ॐ विराधवध-
पण्डिताय नमः।
१८९ ॐ दुस्स्वप्ननाशनाय नमः।
१९० ॐ रम्याय नमः।

१९१ ॐ किरीटिने नमः।
१९२ ॐ त्रिदशाधिपाय नमः।
१९३ ॐ महाधनुषे नमः।
१९४ ॐ महाकायाय नमः।
१९५ ॐ भीमाय नमः।
१९६ ॐ भीमपराक्रमाय नमः।
१९७ ॐ तत्त्वस्वरूपिणे नमः।
१९८ ॐ तत्त्वज्ञाय नमः।
१९९ ॐ तत्त्ववादिने नमः।
२०० ॐ सुविक्रमाय नमः।
२०१ ॐ भूतात्मने नमः।
२०२ ॐ भूतकृते नमः।
२०३ ॐ स्वामिने नमः।
२०४ ॐ कालज्ञानिने नमः।
२०५ ॐ महापटवे नमः।
२०६ ॐ अनिर्विण्णाय नमः।
२०७ ॐ गुणग्राहिणे नमः।
२०८ ॐ निष्कलङ्काय नमः।

२०९ ॐ कलङ्कघ्ने नमः।
२१० ॐ स्वभावभद्राय नमः।
२११ ॐ शत्रुघ्नाय नमः।
२१२ ॐ केशवाय नमः।
२१३ ॐ स्थाणवे नमः।
२१४ ॐ ईश्वराय नमः।
२१५ ॐ भूतादये नमः।
२१६ ॐ शम्भवे नमः।
२१७ ॐ आदित्याय नमः।
२१८ ॐ स्थविष्ठाय नमः।
२१९ ॐ शाश्वताय नमः।
२२० ॐ ध्रुवाय नमः।
२२१ ॐ कवचिने नमः।
२२२ ॐ कुण्डलिने नमः।
२२३ ॐ चक्रिणे नमः।
२२४ ॐ खड्गिने नमः।
२२५ ॐ भक्तजनप्रियाय नमः।
२२६ ॐ अमृत्यवे नमः।

२२७ ॐ जन्मरहिताय नमः।
२२८ ॐ सर्वजिते नमः।
२२९ ॐ सर्वगोचराय नमः।
२३० ॐ अनुत्तमाय नमः।
२३१ ॐ अप्रमेयात्मने नमः।
२३२ ॐ सर्वादये नमः।
२३३ ॐ गुणसागराय नमः।
२३४ ॐ समाय नमः।
२३५ ॐ समात्मने नमः।
२३६ ॐ समगाय नमः।
२३७ ॐ जटामुकुटमण्डिताय नमः।
२३८ ॐ अजेयाय नमः।
२३९ ॐ सर्वभूतात्मने नमः।
२४० ॐ विष्वक्सेनाय नमः।
२४१ ॐ महातपसे नमः।
२४२ ॐ लोकाध्यक्षाय नमः।
२४३ ॐ महाबाहवे नमः।
२४४ ॐ अमृताय नमः।

२४५ ॐ वेदवित्तमाय नमः।
२४६ ॐ सहिष्णवे नमः।
२४७ ॐ सद्गतये नमः।
२४८ ॐ शास्त्रे नमः।
२४९ ॐ विश्वयोनये नमः।
२५० ॐ महाद्युतये नमः।
२५१ ॐ अतीन्द्राय नमः।
२५२ ॐ ऊर्जिताय नमः।
२५३ ॐ प्रांशवे नमः।
२५४ ॐ उपेन्द्राय नमः।
२५५ ॐ वामनाय नमः।
२५६ ॐ बलिने नमः।
२५७ ॐ धनुर्वेदाय नमः।
२५८ ॐ विधात्रे नमः।
२५९ ॐ ब्रह्मणे नमः।
२६० ॐ विष्णवे नमः।
२६१ ॐ शङ्कराय नमः।
२६२ ॐ हंसाय नमः।

२६३ ॐ मरीचये नमः।
२६४ ॐ गोविन्दाय नमः।
२६५ ॐ रत्नगर्भाय नमः।
२६६ ॐ महामतये नमः।
२६७ ॐ व्यासाय नमः।
२६८ ॐ वाचस्पतये नमः।
२६९ ॐ सर्वदर्पितासुरमर्दनाय नमः।
२७० ॐ जानकीवल्लभाय नमः।
२७१ ॐ पूज्याय नमः।
२७२ ॐ प्रकटाय नमः।
२७३ ॐ प्रीतिवर्धनाय नमः।
२७४ ॐ सम्भवाय नमः।
२७५ ॐ अतीन्द्रियाय नमः।
२७६ ॐ वेद्याय नमः।
२७७ ॐ अनिर्देशाय नमः।
२७८ ॐ जाम्बवत्प्रभवे नमः।
२७९ ॐ मदनाय नमः।
२८० ॐ मथनाय नमः।

२८१ ॐ व्यापिने नमः।
२८२ ॐ विश्वरूपाय नमः।
२८३ ॐ निरञ्जनाय नमः।
२८४ ॐ नारायणाय नमः।
२८५ ॐ अग्रण्ये नमः।
२८६ ॐ साधवे नमः।
२८७ ॐ जटायुप्रीतिवर्धनाय नमः।
२८८ ॐ नैकरूपाय नमः।
२८९ ॐ जगन्नाथाय नमः।

२९० ॐ सुरकार्यहिताय नमः।
२९१ ॐ स्वभुवे नमः।
२९२ ॐ जितक्रोधाय नमः।
२९३ ॐ जितारातये नमः।
२९४ ॐ प्लवगाधिपराज्यदाय नमः।
२९५ ॐ वसुदाय नमः।
२९६ ॐ सुभुजाय नमः।
२९७ ॐ नैकमायाय नमः।
२९८ ॐ भव्यप्रमोदनाय नमः।

२९९ ॐ चण्डांशवे नमः।
३०० ॐ सिद्धिदाय नमः।
३०१ ॐ कल्पाय नमः।
३०२ ॐ शरणागतवत्सलाय नमः।
३०३ ॐ अगदाय नमः।
३०४ ॐ रोगहर्त्रे नमः।
३०५ ॐ मन्त्रज्ञाय नमः।
३०६ ॐ मन्त्रभावनाय नमः।
३०७ ॐ सौमित्रिवत्सलाय नमः।
३०८ ॐ धुर्याय नमः।
३०९ ॐ व्यक्ताव्यक्तस्वरूप-धृते नमः।
३१० ॐ वसिष्ठाय नमः।
३११ ॐ ग्रामण्ये नमः।
३१२ ॐ श्रीमते नमः।
३१३ ॐ अनुकूलाय नमः।
३१४ ॐ प्रियंवदाय नमः।
३१५ ॐ अतुलाय नमः।

३१६ ॐ सात्त्विकाय नमः।
३१७ ॐ धीराय नमः।
३१८ ॐ शरासनविशारदाय नमः।
३१९ ॐ ज्येष्ठाय नमः।
३२० ॐ सर्वगुणोपेताय नमः।
३२१ ॐ शक्तिमते नमः।
३२२ ॐ ताटकान्तकाय नमः।
३२३ ॐ वैकुण्ठाय नमः।
३२४ ॐ प्राणिनां प्राणाय नमः।
३२५ ॐ कमठाय नमः।
३२६ ॐ कमलापतये नमः।
३२७ ॐ गोवर्धनधराय नमः।
३२८ ॐ मत्स्यरूपाय नमः।
३२९ ॐ कारुण्यसागराय नमः।
३३० ॐ कुम्भकर्णप्रभेत्त्रे नमः।
३३१ ॐ गोपिगोपाल-संवृताय नमः।
३३२ ॐ मायाविने नमः।

३३३ ॐ व्यापकाय नमः।
३३४ ॐ व्यापिने नमः।
३३५ ॐ रैणुकेयबलापहाय नमः।
३३६ ॐ पिनाकमथनाय नमः।
३३७ ॐ वन्द्याय नमः।
३३८ ॐ समर्थाय नमः।
३३९ ॐ गरुडध्वजाय नमः।
३४० ॐ लोकत्रयाश्रयाय नमः।
३४१ ॐ लोकचरिताय नमः।
३४२ ॐ भरताग्रजाय नमः।
३४३ ॐ श्रीधराय नमः।
३४४ ॐ सद्गतये नमः।
३४५ ॐ लोकसाक्षिणे नमः।
३४६ ॐ नारायणाय नमः।
३४७ ॐ बुधाय नमः।
३४८ ॐ मनोवेगिने नमः।
३४९ ॐ मनोरूपिणे नमः।
३५० ॐ पूर्णाय नमः।

३५१ ॐ पुरुषपुङ्गवाय नमः।
३५२ ॐ यदुश्रेष्ठाय नमः।
३५३ ॐ यदुपतये नमः।
३५४ ॐ भूतावासाय नमः।
३५५ ॐ सुविक्रमाय नमः।
३५६ ॐ तेजोधराय नमः।
३५७ ॐ धराधाराय नमः।
३५८ ॐ चतुर्मूर्तये नमः।
३५९ ॐ महानिधये नमः।
३६० ॐ चाणूरमर्दनाय नमः।
३६१ ॐ दिव्याय नमः।
३६२ ॐ शान्ताय नमः।
३६३ ॐ भरतवन्दिताय नमः।
३६४ ॐ शब्दातिगाय नमः।
३६५ ॐ गभीरात्मने नमः।
३६६ ॐ कोमलाङ्गाय नमः।
३६७ ॐ प्रजागराय नमः।
३६८ ॐ लोकगर्भाय नमः।

३६९ ॐ शेषशायिने नमः।
३७० ॐ क्षीराब्धिनिलयाय नमः।
३७१ ॐ अमलाय नमः।
३७२ ॐ आत्मयोनये नमः।
३७३ ॐ अदीनात्मने नमः।
३७४ ॐ सहस्त्राक्षाय नमः।
३७५ ॐ सहस्त्रपदे नमः।
३७६ ॐ अमृतांशवे नमः।
३७७ ॐ महागर्भाय नमः।
३७८ ॐ निवृत्तविषयस्पृहाय नमः।
३७९ ॐ त्रिकालज्ञाय नमः।
३८० ॐ मुनये नमः।
३८१ ॐ साक्षिणे नमः।
३८२ ॐ विहायसगतये नमः।
३८३ ॐ कृतिने नमः।
३८४ ॐ पर्जन्याय नमः।
३८५ ॐ कुमुदाय नमः।
३८६ ॐ भूतावासाय नमः।

३८७ ॐ कमललोचनाय नमः।
३८८ ॐ श्रीवत्सवक्षसे नमः।
३८९ ॐ श्रीवासाय नमः।
३९० ॐ वीरघ्ने नमः।
३९१ ॐ लक्ष्मणाग्रजाय नमः।
३९२ ॐ लोकाभिरामाय नमः।
३९३ ॐ लोकारिमर्दनाय नमः।
३९४ ॐ सेवकप्रियाय नमः।
३९५ ॐ सनातनतमाय नमः।
३९६ ॐ मेघश्यामलाय नमः।
३९७ ॐ राक्षसान्तकृते नमः।
३९८ ॐ दिव्यायुधधराय नमः।
३९९ ॐ श्रीमते नमः।
४०० ॐ अप्रमेयाय नमः।
४०१ ॐ जितेन्द्रियाय नमः।
४०२ ॐ भूदेववन्द्याय नमः।
४०३ ॐ जनकप्रियकृते नमः।
४०४ ॐ प्रपितामहाय नमः।

४०५ ॐ उत्तमाय नमः।
४०६ ॐ सात्त्विकाय नमः।
४०७ ॐ सत्याय नमः।
४०८ ॐ सत्यसन्धाय नमः।
४०९ ॐ त्रिविक्रमाय नमः।
४१० ॐ सुव्रताय नमः।
४११ ॐ सुलभाय नमः।
४१२ ॐ सूक्ष्माय नमः।
४१३ ॐ सुघोषाय नमः।
४१४ ॐ सुखदाय नमः।
४१५ ॐ सुधिये नमः।
४१६ ॐ दामोदराय नमः।
४१७ ॐ अच्युताय नमः।
४१८ ॐ शार्ङ्गिणे नमः।
४१९ ॐ वामनाय नमः।
४२० ॐ मधुराधिपाय नमः।
४२१ ॐ देवकीनन्दनाय नमः।
४२२ ॐ शौरये नमः।

४२३ ॐ शूराय नमः।
४२४ ॐ कैटभमर्दनाय नमः।
४२५ ॐ सप्ततालप्रभेत्त्रे नमः।
४२६ ॐ मित्रवंशप्रवर्धनाय नमः।
४२७ ॐ कालस्वरूपिणे नमः।
४२८ ॐ कालात्मने नमः।
४२९ ॐ कालाय नमः।
४३० ॐ कल्याणदाय नमः।
४३१ ॐ कवये नमः।
४३२ ॐ संवत्सराय नमः।
४३३ ॐ ऋतवे नमः।
४३४ ॐ पक्षाय नमः।
४३५ ॐ अयनाय नमः।
४३६ ॐ दिवसाय नमः।
४३७ ॐ युगाय नमः।
४३८ ॐ स्तव्याय नमः।
४३९ ॐ विविक्ताय नमः।
४४० ॐ निर्लेपायः नमः।

४४१ ॐ सर्वव्यापिने नमः।
४४२ ॐ निराकुलाय नमः।
४४३ ॐ अनादिनिधनाय नमः।
४४४ ॐ सर्वलोकपूज्याय नमः।
४४५ ॐ निरामयाय नमः।
४४६ ॐ रसाय नमः।
४४७ ॐ रसज्ञाय नमः।
४४८ ॐ सारज्ञाय नमः।
४४९ ॐ लोकसाराय नमः।
४५० ॐ रसात्मकाय नमः।
४५१ ॐ सर्वदुःखातिगाय नमः।
४५२ ॐ विद्याराशये नमः।
४५३ ॐ परमगोचराय नमः।
४५४ ॐ शेषाय नमः।
४५५ ॐ विशेषाय नमः।
४५६ ॐ विगतकल्मषाय नमः।
४५७ ॐ रघुनायकाय नमः।
४५८ ॐ वर्णश्रेष्ठाय नमः।

४५९ ॐ वर्णवाह्याय नमः।
४६० ॐ वर्ण्याय नमः।
४६१ ॐ वर्ण्यगुणोज्ज्वलाय नमः।
४६२ ॐ कर्मसाक्षिणे नमः।
४६३ ॐ अमरश्रेष्ठाय नमः।
४६४ ॐ देवदेवाय नमः।
४६५ ॐ सुखप्रदाय नमः।
४६६ ॐ देवाधिदेवाय नमः।
४६७ ॐ देवर्षये नमः।
४६८ ॐ देवासुरनमस्कृताय नमः।
४६९ ॐ सर्वदेवमयाय नमः।
४७० ॐ चक्रिणे नमः।
४७१ ॐ शार्ङ्गपाणये नमः।
४७२ ॐ रघूत्तमाय नमः।
४७३ ॐ मनसे नमः।
४७४ ॐ बुद्ध्यै नमः।
४७५ ॐ अहंकाराय नमः।
४७६ ॐ प्रकृत्यै नमः।

४७७ ॐ पुरुषाय नमः।
४७८ ॐ अव्ययाय नमः।
४७९ ॐ अहल्यापावनाय नमः।
४८० ॐ स्वामिने नमः।
४८१ ॐ पितृभक्ताय नमः।
४८२ ॐ वरप्रदाय नमः।
४८३ ॐ न्यायाय नमः।
४८४ ॐ न्यायिने नमः।
४८५ ॐ नयिने नमः।
४८६ ॐ श्रीमते नमः।
४८७ ॐ नयाय नमः।
४८८ ॐ नगधराय नमः।
४८९ ॐ ध्रुवाय नमः।
४९० ॐ लक्ष्मीविश्वम्भराभर्त्रे नमः।
४९१ ॐ देवेन्द्राय नमः।
४९२ ॐ बलिमर्दनाय नमः।
४९३ ॐ वाणारिमर्दनाय नमः।
४९४ ॐ यज्वने नमः।

४९५ ॐ अनुत्तमाय नमः।
४९६ ॐ मुनिसेविताय नमः।
४९७ ॐ देवाग्रणये नमः।
४९८ ॐ शिवध्यानतत्पराय नमः।
४९९ ॐ परमाय नमः।
५०० ॐ परस्मै नमः।
५०१ ॐ सामगेयाय नमः।
५०२ ॐ प्रियाय नमः।
५०३ ॐ अक्रूराय नमः।
५०४ ॐ पुण्यकीर्तये नमः।
५०५ ॐ सुलोचनाय नमः।
५०६ ॐ पुण्याय नमः।
५०७ ॐ पुण्याधिकाय नमः।
५०८ ॐ पूर्वस्मै नमः।
५०९ ॐ पूर्णाय नमः।
५१० ॐ पूरयित्रे नमः।
५११ ॐ रवये नमः।
५१२ ॐ जटिलाय नमः।

५१३ ॐ कल्मषध्वान्तप्रभञ्जन-
विभावसवे नमः।
५१४ ॐ अव्यक्तलक्षणाय नमः।
५१५ ॐ अव्यक्ताय नमः।
५१६ ॐ दशास्यद्विपकेसरिणे नमः।
५१७ ॐ कलानिधये नमः।
५१८ ॐ कलानाथाय नमः।
५१९ ॐ कमलानन्दवर्धनाय नमः।
५२० ॐ जयिने नमः।

५२१ ॐ जितारये नमः।
५२२ ॐ सर्वादये नमः।
५२३ ॐ शमनाय नमः।
५२४ ॐ भवभञ्जनाय नमः।
५२५ ॐ अलङ्करिष्णवे नमः।
५२६ ॐ अचलाय नमः।
५२७ ॐ रोचिष्णवे नमः।
५२८ ॐ विक्रमोत्तमाय नमः।
५२९ ॐ आशवे नमः।

५३० ॐ शब्दपतये नमः।
५३१ ॐ शब्दागोचराय नमः।
५३२ ॐ रञ्जनाय नमः।
५३३ ॐ रघवे नमः।
५३४ ॐ निश्शब्दाय नमः।
५३५ ॐ प्रणवाय नमः।
५३६ ॐ मालिने नमः।
५३७ ॐ स्थूलाय नमः।
५३८ ॐ सूक्ष्माय नमः।
५३९ ॐ विलक्षणाय नमः।
५४० ॐ आत्मयोनये नमः।
५४१ ॐ अयोनये नमः।
५४२ ॐ सप्तजिह्वाय नमः।
५४३ ॐ सहस्त्रपदे नमः।
५४४ ॐ सनातनतमाय नमः।
५४५ ॐ स्त्रग्विणे नमः।
५४६ ॐ पेशलाय नमः।
५४७ ॐ जविनां वराय नमः।

५४८ ॐ शक्तिमते नमः।
५४९ ॐ शङ्खभृते नमः।
५५० ॐ नाथाय नमः।
५५१ ॐ गदापद्मरथाङ्गभृते नमः।
५५२ ॐ निरीहाय नमः।
५५३ ॐ निर्विकल्पाय नमः।
५५४ ॐ चिद्रूपाय नमः।
५५५ ॐ वीतसाध्वसाय नमः।
५५६ ॐ शताननाय नमः।
५५७ ॐ सहस्त्राक्षाय नमः।
५५८ ॐ शतमूर्तये नमः।
५५९ ॐ घनप्रभाय नमः।
५६० ॐ हृत्पुण्डरीकशयनाय नमः।
५६१ ॐ कठिनाय नमः।
५६२ ॐ द्रवाय नमः।
५६३ ॐ उग्राय नमः।
५६४ ॐ ग्रहपतये नमः।
५६५ ॐ श्रीमते नमः।

५६६ ॐ समर्थाय नमः।
५६७ ॐ अनर्थनाशनाय नमः।
५६८ ॐ अधर्मशत्रवे नमः।
५६९ ॐ रक्षोघ्नाय नमः।
५७० ॐ पुरुहूताय नमः।
५७१ ॐ पुरुष्टुताय नमः।
५७२ ॐ ब्रह्मगर्भाय नमः।
५७३ ॐ बृहद्गर्भाय नमः।
५७४ ॐ धर्मधेनवे नमः।
५७५ ॐ धनागमाय नमः।
५७६ ॐ हिरण्यगर्भाय नमः।
५७७ ॐ ज्योतिष्मते नमः।
५७८ ॐ सुललाटाय नमः।
५७९ ॐ सुविक्रमाय नमः।
५८० ॐ शिवपूजारताय नमः।
५८१ ॐ श्रीमते नमः।
५८२ ॐ भवानीप्रियकृते नमः।
५८३ ॐ वशिने नमः।

५८४ ॐ नराय नमः।

५८५ ॐ नारायणाय नमः।

५८६ ॐ श्यामाय नमः।

५८७ ॐ कपर्दिने नमः।

५८८ ॐ नीललोहिताय नमः।

५८९ ॐ रुद्राय नमः।

५९० ॐ पशुपतये नमः।

५९१ ॐ स्थाणवे नमः।

५९२ ॐ विश्वामित्राय नमः।

५९३ ॐ द्विजेश्वराय नमः।

५९४ ॐ मातामहाय नमः।

५९५ ॐ मातरिश्वने नमः।

५९६ ॐ विरिञ्चाय नमः।

५९७ ॐ विष्टरश्रवसे नमः।

५९८ ॐ सर्वभूताना-
मक्षोभ्याय नमः।

५९९ ॐ चण्डाय नमः।

६०० ॐ सत्यपराक्रमाय नमः।

६०१ ॐ वालखिल्याय नमः।
६०२ ॐ महाकल्पाय नमः।
६०३ ॐ कल्पवृक्षाय नमः।
६०४ ॐ कलाधराय नमः।
६०५ ॐ निदाघाय नमः।
६०६ ॐ तपनाय नमः।
६०७ ॐ अमोघाय नमः।
६०८ ॐ श्लक्ष्णाय नमः।
६०९ ॐ परबलापहृते नमः।
६१० ॐ कबन्धमथनाय नमः।
६११ ॐ दिव्याय नमः।
६१२ ॐ कम्बुग्रीवशिव-प्रियाय नमः।
६१३ ॐ शङ्खाय नमः।
६१४ ॐ अनिलाय नमः।
६१५ ॐ सुनिष्पन्नाय नमः।
६१६ ॐ सुलभाय नमः।
६१७ ॐ शिशिरात्मकाय नमः।

६१८ ॐ असंसृष्टाय नमः।
६१९ ॐ अतिथये नमः।
६२० ॐ शूराय नमः।
६२१ ॐ प्रमाथिने नमः।
६२२ ॐ पापनाशकृते नमः।
६२३ ॐ वसुश्रवसे नमः।
६२४ ॐ कव्यवाहाय नमः।
६२५ ॐ प्रतप्ताय नमः।
६२६ ॐ विश्वभोजनाय नमः।
६२७ ॐ रामाय नमः।
६२८ ॐ नीलोत्पलश्यामाय नमः।
६२९ ॐ ज्ञानस्कन्धाय नमः।
६३० ॐ महाद्युतये नमः।
६३१ ॐ पवित्रपादाय नमः।
६३२ ॐ पापारये नमः।
६३३ ॐ मणिपूराय नमः।
६३४ ॐ नभोगतये नमः।
६३५ ॐ उत्तारणाय नमः।

६३६ ॐ दुष्कृतिघ्ने नमः।
६३७ ॐ दुर्धर्षाय नमः।
६३८ ॐ दुस्सहाय नमः।
६३९ ॐ अभयाय नमः।
६४० ॐ अमृतेशाय नमः।
६४१ ॐ अमृतवपुषे नमः।
६४२ ॐ धर्मिणे नमः।
६४३ ॐ धर्माय नमः।
६४४ ॐ कृपाकराय नमः।
६४५ ॐ भर्गाय नमः।
६४६ ॐ विवस्वते नमः।
६४७ ॐ आदित्याय नमः।
६४८ ॐ योगाचार्याय नमः।
६४९ ॐ दिवस्पतये नमः।
६५० ॐ उदारकीर्तये नमः।
६५१ ॐ उद्योगिने नमः।
६५२ ॐ वाङ्मयाय नमः।
६५३ ॐ सदसन्मयाय नमः।

६५४ ॐ नक्षत्रमालिने नमः।
६५५ ॐ नाकेशाय नमः।
६५६ ॐ स्वाधिष्ठानाय नमः।
६५७ ॐ षडाश्रयाय नमः।
६५८ ॐ चतुर्वर्गफलाय नमः।
६५९ ॐ वर्णिने नमः।
६६० ॐ शक्तित्रयफलाय नमः।
६६१ ॐ निधये नमः।
६६२ ॐ निधानगर्भाय नमः।
६६३ ॐ निर्व्याजाय नमः।
६६४ ॐ गिरीशाय नमः।
६६५ ॐ व्यालमर्दनाय नमः।
६६६ ॐ श्रीवल्लभाय नमः।
६६७ ॐ शिवारम्भाय नमः।
६६८ ॐ शान्तये नमः।
६६९ ॐ भद्राय नमः।
६७० ॐ समञ्जसाय नमः।
६७१ ॐ भूशयाय नमः।

६७२ ॐ भूतिकृते नमः।
६७३ ॐ भूत्यै नमः।
६७४ ॐ भूषणाय नमः।
६७५ ॐ भूतवाहनाय नमः।
६७६ ॐ अकायाय नमः।
६७७ ॐ भक्तकायस्थाय नमः।
६७८ ॐ कालज्ञानिने नमः।
६७९ ॐ महावटवे नमः।
६८० ॐ परार्थवृत्तये नमः।
६८१ ॐ अचलाय नमः।
६८२ ॐ विविक्ताय नमः।
६८३ ॐ श्रुतिसागराय नमः।
६८४ ॐ स्वभावभद्राय नमः।
६८५ ॐ मध्यस्थाय नमः।
६८६ ॐ संसारभयनाशनाय नमः।
६८७ ॐ वेद्याय नमः।
६८८ ॐ वैद्याय नमः।
६८९ ॐ वियद्गोप्त्रे नमः।

६९० ॐ सर्वामरमुनीश्वराय नमः।
६९१ ॐ सुरेन्द्राय नमः।
६९२ ॐ करणाय नमः।
६९३ ॐ कर्मणे नमः।
६९४ ॐ कर्मकृते नमः।
६९५ ॐ कर्मिणे नमः।
६९६ ॐ अधोक्षजाय नमः।
६९७ ॐ ध्येयाय नमः।
६९८ ॐ धुर्याय नमः।
६९९ ॐ धराधीशाय नमः।
७०० ॐ संकल्पाय नमः।
७०१ ॐ शर्वरीपतये नमः।
७०२ ॐ परमार्थगुरवे नमः।
७०३ ॐ वृद्धाय नमः।
७०४ ॐ शुचये नमः।
७०५ ॐ आश्रितवत्सलाय नमः।
७०६ ॐ विष्णवे नमः।
७०७ ॐ जिष्णवे नमः।

७०८ ॐ विभवे नमः।
७०९ ॐ वन्द्याय नमः।
७१० ॐ यज्ञेशाय नमः।
७११ ॐ यज्ञपालकाय नमः।
७१२ ॐ प्रभविष्णवे नमः।
७१३ ॐ ग्रसिष्णवे नमः।
७१४ ॐ लोकात्मने नमः।
७१५ ॐ लोकभावनाय नमः।
७१६ ॐ केशवाय नमः।
७१७ ॐ केशिघ्ने नमः।
७१८ ॐ काव्याय नमः।
७१९ ॐ कवये नमः।
७२० ॐ कारणकारणाय नमः।
७२१ ॐ कालकर्त्रे नमः।
७२२ ॐ कालशेषाय नमः।
७२३ ॐ वासुदेवाय नमः।
७२४ ॐ पुरुष्टुताय नमः।
७२५ ॐ आदिकर्त्रे नमः।

७२६ ॐ वराहाय नमः।
७२७ ॐ माधवाय नमः।
७२८ ॐ मधुसूदनाय नमः।
७२९ ॐ नारायणाय नमः।
७३० ॐ नराय नमः।
७३१ ॐ हंसाय नमः।
७३२ ॐ विष्वक्सेनाय नमः।
७३३ ॐ जनार्दनाय नमः।
७३४ ॐ विश्वकर्त्रे नमः।
७३५ ॐ महायज्ञाय नमः।
७३६ ॐ ज्योतिष्मते नमः।
७३७ ॐ पुरुषोत्तमाय नमः।
७३८ ॐ वैकुण्ठाय नमः।
७३९ ॐ पुण्डरीकाक्षाय नमः।
७४० ॐ कृष्णाय नमः।
७४१ ॐ सूर्याय नमः।
७४२ ॐ सुरार्चिताय नमः।
७४३ ॐ नारसिंहाय नमः।

७४४ ॐ महाभीमाय नमः।
७४५ ॐ वक्रदंष्ट्राय नमः।
७४६ ॐ नखायुधाय नमः।
७४७ ॐ आदिदेवाय नमः।
७४८ ॐ जगत्कर्त्रे नमः।
७४९ ॐ योगीशाय नमः।
७५० ॐ गरुडध्वजाय नमः।
७५१ ॐ गोविन्दाय नमः।
७५२ ॐ गोपतये नमः।
७५३ ॐ गोप्त्रे नमः।
७५४ ॐ भूपतये नमः।
७५५ ॐ भुवनेश्वराय नमः।
७५६ ॐ पद्मनाभाय नमः।
७५७ ॐ हृषीकेशाय नमः।
७५८ ॐ धात्रे नमः।
७५९ ॐ दामोदराय नमः।
७६० ॐ प्रभवे नमः।
७६१ ॐ त्रिविक्रमाय नमः।

७६२ ॐ त्रिलोकेशाय नमः।
७६३ ॐ ब्रह्मेशाय नमः।
७६४ ॐ प्रीतिवर्धनाय नमः।
७६५ ॐ वामनाय नमः।
७६६ ॐ दुष्टदमनाय नमः।
७६७ ॐ गोविन्दाय नमः।
७६८ ॐ गोपवल्लभाय नमः।
७६९ ॐ भक्तप्रियाय नमः।
७७० ॐ अच्युताय नमः।
७७१ ॐ सत्याय नमः।
७७२ ॐ सत्यकीर्तये नमः।
७७३ ॐ धृत्यै नमः।
७७४ ॐ स्मृत्यै नमः।
७७५ ॐ कारुण्याय नमः।
७७६ ॐ करुणाय नमः।
७७७ ॐ व्यासाय नमः।
७७८ ॐ पापघ्ने नमः।
७७९ ॐ शान्तिवर्धनाय नमः।

७८० ॐ संन्यासिने नमः।
७८१ ॐ शास्त्रतत्त्वज्ञाय नमः।
७८२ ॐ मन्दराद्रिनिकेतनाय नमः।
७८३ ॐ बदरीनिलयाय नमः।
७८४ ॐ शान्ताय नमः।
७८५ ॐ तपस्विने नमः।
७८६ ॐ वैद्युतप्रभाय नमः।
७८७ ॐ भूतावासाय नमः।
७८८ ॐ गुहावासाय नमः।
७८९ ॐ श्रीनिवासाय नमः।
७९० ॐ श्रियः पतये नमः।
७९१ ॐ तपोवासाय नमः।
७९२ ॐ मुदावासाय नमः।
७९३ ॐ सत्यवासाय नमः।
७९४ ॐ सनातनाय नमः।
७९५ ॐ पुरुषाय नमः।
७९६ ॐ पुष्कराय नमः।
७९७ ॐ पुण्याय नमः।

७९८ ॐ पुष्कराक्षाय नमः।
७९९ ॐ महेश्वराय नमः।
८०० ॐ पूर्णमूर्तये नमः।
८०१ ॐ पुराणज्ञाय नमः।
८०२ ॐ पुण्यदाय नमः।
८०३ ॐ प्रीतिवर्धनाय नमः।
८०४ ॐ शङ्खिने नमः।
८०५ ॐ चक्रिणे नमः।
८०६ ॐ गदिने नमः।
८०७ ॐ शार्ङ्गिणे नमः।
८०८ ॐ लाङ्गलिने नमः।
८०९ ॐ मुसलिने नमः।
८१० ॐ हलिने नमः।
८११ ॐ किरीटिने नमः।
८१२ ॐ कुण्डलिने नमः।
८१३ ॐ हारिणे नमः।
८१४ ॐ मेखलिने नमः।
८१५ ॐ कवचिने नमः।

८१६ ॐ ध्वजिने नमः।
८१७ ॐ योद्ध्रे नमः।
८१८ ॐ जेत्रे नमः।
८१९ ॐ महावीर्याय नमः।
८२० ॐ शत्रुजिते नमः।
८२१ ॐ शत्रुतापनाय नमः।
८२२ ॐ शास्त्रे नमः।
८२३ ॐ शास्त्रकराय नमः।
८२४ ॐ शास्त्राय नमः।
८२५ ॐ शङ्कराय नमः।
८२६ ॐ शङ्करस्तुताय नमः।
८२७ ॐ सारथये नमः।
८२८ ॐ सात्त्विकाय नमः।
८२९ ॐ स्वामिने नमः।
८३० ॐ सामवेदप्रियाय नमः।
८३१ ॐ समाय नमः।
८३२ ॐ पवनाय नमः।
८३३ ॐ संहताय नमः।

८३४ ॐ शक्तये नमः।
८३५ ॐ सम्पूर्णाङ्गाय नमः।
८३६ ॐ समृद्धिमते नमः।
८३७ ॐ स्वर्गदाय नमः।
८३८ ॐ कामदाय नमः।
८३९ ॐ श्रीदाय नमः।
८४० ॐ कीर्तिदाय नमः।
८४१ ॐ अकीर्तिनाशनाय नमः।
८४२ ॐ मोक्षदाय नमः।
८४३ ॐ पुण्डरीकाक्षाय नमः।
८४४ ॐ क्षीराब्धिकृत-
केतनाय नमः।
८४५ ॐ सर्वात्मने नमः।
८४६ ॐ सर्वलोकेशाय नमः।
८४७ ॐ प्रेरकाय नमः।
८४८ ॐ पापनाशनाय नमः।
८४९ ॐ सर्वव्यापिने नमः।
८५० ॐ जगन्नाथाय नमः।

८५१ ॐ सर्वलोकमहेश्वराय नमः।
८५२ ॐ सर्गस्थित्यन्तकृते नमः।
८५३ ॐ देवाय नमः।
८५४ ॐ सर्वलोकसुखा-
वहाय नमः।
८५५ ॐ अक्षय्याय नमः।
८५६ ॐ शाश्वताय नमः।
८५७ ॐ अनन्ताय नमः।
८५८ ॐ क्षयवृद्धिविवर्जिताय नमः।
८५९ ॐ निर्लेपाय नमः।
८६० ॐ निर्गुणाय नमः।
८६१ ॐ सूक्ष्माय नमः।
८६२ ॐ निर्विकाराय नमः।
८६३ ॐ निरञ्जनाय नमः।
८६४ ॐ सर्वोपाधिविनिर्मुक्ताय नमः।
८६५ ॐ सत्तामात्रव्यवस्थिताय नमः।
८६६ ॐ अधिकारिणे नमः।
८६७ ॐ विभवे नमः।

८६८ ॐ नित्याय नमः।
८६९ ॐ परमात्मने नमः।
८७० ॐ सनातनाय नमः।
८७१ ॐ अचलाय नमः।
८७२ ॐ निर्मलाय नमः।
८७३ ॐ व्यापिने नमः।
८७४ ॐ नित्यतृप्ताय नमः।
८७५ ॐ निराश्रयाय नमः।
८७६ ॐ श्यामाय नमः।
८७७ ॐ यूने नमः।
८७८ ॐ लोहिताक्षाय नमः।
८७९ ॐ दीप्तास्याय नमः।
८८० ॐ मितभाषणाय नमः।
८८१ ॐ आजानुबाहवे नमः।
८८२ ॐ सुमुखाय नमः।
८८३ ॐ सिंहस्कन्धाय नमः।
८८४ ॐ महाभुजाय नमः।
८८५ ॐ सत्यवते नमः।

८८६ ॐ गुणसम्पन्नाय नमः।

८८७ ॐ स्वयंतेजसे नमः।

८८८ ॐ सुदीप्तिमते नमः।

८८९ ॐ कालात्मने नमः।

८९० ॐ भगवते नमः

८९१ ॐ कालाय नमः।

८९२ ॐ कालचक्र-
प्रवर्तकाय नमः।

८९३ ॐ नारायणाय नमः।

८९४ ॐ परस्मै ज्योतिषे नमः।

८९५ ॐ परमात्मने नमः।

८९६ ॐ सनातनाय नमः।

८९७ ॐ विश्वसृजे नमः।

८९८ ॐ विश्वगोप्त्रे नमः।

८९९ ॐ विश्वभोक्त्रे नमः।

९०० ॐ शाश्वताय नमः।

९०१ ॐ विश्वेश्वराय नमः।

९०२ ॐ विश्वमूर्तये नमः।

१०३ ॐ विश्वात्मने नमः।
१०४ ॐ विश्वभावनाय नमः।
१०५ ॐ सर्वभूतसुहृदे नमः।
१०६ ॐ शान्ताय नमः।
१०७ ॐ सर्वभूतानुकम्पनाय नमः।
१०८ ॐ सर्वेश्वरेश्वराय नमः।
१०९ ॐ सर्वस्मै नमः।
११० ॐ श्रीमते नमः।
१११ ॐ आश्रितवत्सलाय नमः।
११२ ॐ सर्वगाय नमः।
११३ ॐ सर्वभूतेशाय नमः।
११४ ॐ सर्वभूताशयस्थिताय नमः।
११५ ॐ अभ्यन्तरस्थाय नमः।
११६ ॐ तमसश्छेत्त्रे नमः।
११७ ॐ नारायणाय नमः।
११८ ॐ परस्मै नमः।
११९ ॐ अनादिनिधनाय नमः।
१२० ॐ स्त्रष्ट्रे नमः।

१२१ ॐ प्रजापतिपतये नमः।
१२२ ॐ हरये नमः।
१२३ ॐ नरसिंहाय नमः।
१२४ ॐ हृषीकेशाय नमः।
१२५ ॐ सर्वात्मने नमः।
१२६ ॐ सर्वदृशे नमः।
१२७ ॐ वशिने नमः।
१२८ ॐ जगतस्तस्थुषाय नमः।
१२९ ॐ प्रभवे नमः।
१३० ॐ नेत्रे नमः।
१३१ ॐ सनातनाय नमः।
१३२ ॐ कर्त्रे नमः।
१३३ ॐ धात्रे नमः।
१३४ ॐ विधात्रे नमः।
१३५ ॐ सर्वेषां प्रभवे नमः।
१३६ ॐ ईश्वराय नमः।
१३७ ॐ सहस्त्रमूर्तये नमः।
१३८ ॐ विश्वात्मने नमः।

१३९ ॐ विष्णवे नमः।
१४० ॐ विश्वदृशे नमः।
१४१ ॐ अव्ययाय नमः।
१४२ ॐ पुराणपुरुषाय नमः।
१४३ ॐ स्त्रष्ट्रे नमः।
१४४ ॐ सहस्त्राक्षाय नमः।
१४५ ॐ सहस्त्रपदे नमः।
१४६ ॐ तत्त्वाय नमः।
१४७ ॐ नारायणाय नमः।
१४८ ॐ विष्णवे नमः।
१४९ ॐ वासुदेवाय नमः।
१५० ॐ सनातनाय नमः।
१५१ ॐ परमात्मने नमः।
१५२ ॐ परस्मै ब्रह्मणे नमः।
१५३ ॐ सच्चिदानन्दविग्रहाय नमः।
१५४ ॐ परस्मै ज्योतिषे नमः।
१५५ ॐ परस्मै धाम्ने नमः।
१५६ ॐ पराकाशाय नमः।

१५७ ॐ परात्परस्मै नमः।
१५८ ॐ अच्युताय नमः।
१५९ ॐ पुरुषाय नमः।
१६० ॐ कृष्णाय नमः।
१६१ ॐ शाश्वताय नमः।
१६२ ॐ शिवाय नमः।
१६३ ॐ ईश्वराय नमः।
१६४ ॐ नित्याय नमः।
१६५ ॐ सर्वगताय नमः।
१६६ ॐ स्थाणवे नमः।
१६७ ॐ उग्राय नमः।
१६८ ॐ साक्षिणे नमः।
१६९ ॐ प्रजापतये नमः।
१७० ॐ हिरण्यगर्भाय नमः।
१७१ ॐ सवित्रे नमः।
१७२ ॐ लोककृते नमः।
१७३ ॐ लोकभृते नमः।
१७४ ॐ विभवे नमः।

१७५ ॐ रामाय नमः।
१७६ ॐ श्रीमते नमः।
१७७ ॐ महाविष्णवे नमः।
१७८ ॐ जिष्णवे नमः।
१७९ ॐ देवहितावहाय नमः।
१८० ॐ तत्त्वात्मने नमः।
१८१ ॐ तारकाय नमः।
१८२ ॐ ब्रह्मणे नमः।
१८३ ॐ शाश्वताय नमः।
१८४ ॐ सर्वसिद्धिदाय नमः।
१८५ ॐ अकारवाच्याय नमः।
१८६ ॐ भगवते नमः।
१८७ ॐ श्रियै नमः।
१८८ ॐ भूलीलापतये नमः।
१८९ ॐ पुंसे नमः।
१९० ॐ सर्वलोकेश्वराय नमः।
१९१ ॐ श्रीमते नमः।

९९२ ॐ सर्वज्ञाय नमः।

९९३ ॐ सर्वतोमुखाय नमः।

९९४ ॐ स्वामिने नमः।

९९५ ॐ सुशीलाय नमः।

९९६ ॐ सुलभाय नमः।

९९७ ॐ सर्वज्ञाय नमः।

९९८ ॐ सर्वशक्तिमते नमः।

९९९ ॐ नित्याय नमः।

१००० ॐ सम्पूर्णकामाय नमः।

१००१ ॐ नैसर्गिकसुहृदे नमः।

१००२ ॐ सुखिने नमः।

१००३ ॐ कृपापीयूष-
जलधये नमः।

१००४ ॐ सर्वदेहिनां
शरण्याय नमः।

१००५ ॐ श्रीमते नमः।

१००६ ॐ नारायणाय नमः।
१००७ ॐ स्वामिने नमः।
१००८ ॐ जगतां पतये नमः।
१००९ ॐ ईश्वराय नमः।
१०१० ॐ श्रीशाय नमः।
१०११ ॐ भूतानां शरण्याय नमः।
१०१२ ॐ संश्रिताभीष्ट-
दायकाय नमः।
१०१३ ॐ अनन्ताय नमः।
१०१४ ॐ श्रीपतये नमः।
१०१५ ॐ रामाय नमः।
१०१६ ॐ गुणभृते नमः।
१०१७ ॐ निर्गुणाय नमः।
१०१८ ॐ महते नमः।

॥ इति श्रीआनन्दरामायणे वाल्मीकीये श्रीरामसहस्त्रनामावलिः सम्पूर्णा ॥